# Lokatantram Jayet

# लोकतन्त्रं जयेत्

## Document Information

Text title : Lokatantram Jayet

File name : lokatantraMjayet.itx

Category : misc, sanskritgeet

Location : doc_z_misc_general

Author : Kapiladeva Dwivedi

Proofread by : Mandar Mali

Translated by : Mandar Mali

Description/comments : Rashtragitanjali, Kapiladeva Dwivedi (Ed.)

Acknowledge-Permission: Kapiladeva Dwivedi, Vishvabharati Anusandhan Parishad, Varanasi

Latest update : May 1, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 31, 2020

*sanskritdocuments.org*

# लोकतन्त्रं जयेत्

(स्रग्विणी वृत्तम्)
लोकतन्त्रे हितं लोकतन्त्रे सुखं
लोकतन्याश्रया वृत्तिरिष्टा जने ।
लोकतन्त्रे जनानां, समृद्धि शुभां
लोकतन्त्रे जनानां विवृद्धि ध्रुवा ॥

लोकतन्त्रे जनानां मतं शासनं
लोक्तन्त्रे जनानां हितं साधनम् ।
लोकतन्त्रे जनानां प्रभुत्वं मतं
लोकतन्त्रे जनाना गुरुत्व मतम् ॥

लोकतन्त्रे क्रिया राष्ट्र-संवर्धनी
लोकतन्त्रे गतिर्गौरवाधायिनी ।
लोकतन्त्रे धृति सत्यनिष्ठा मतां
लोकतन्त्रे धृतिं सर्व-दुःखौघहा ॥

लोकतन्त्रे न किं किं सुखं साध्यते
लोकतन्त्रे न किं गौरवं प्राप्यते ।
लोकतन्त्रे न किं मानमासाद्यते
लोकतन्त्रे न वा किं हितं लभ्यते ॥

लोकतन्त्रे न धर्मादि भेदो मतम्,
लोकतन्त्रे न जात्यादि-भेद् शुभम् ।
लोकतन्त्रे न वा शोषणं सम्मतं
लोकन्त्रे न हिंसा-प्रवृत्तिर्वृता ॥

लोकतन्त्रे गुणाः सर्वधर्मोदयो
वर्ण-भेदो न वा वर्ग-भेदो मतम् ।
लोकतन्त्रे न व्यष्टेर्महत्त्वं मतं

लोकतन्त्रे समष्टेर्गुणा संहती ॥

लोकतन्त्रे न दैन्यं न वा शोषणं
क्षुत्पिपासाऽऽधि-व्याधे सदा शोषणम् ।
दीन-हीनार्त-लोकस्य संरक्षणं
संस्कृतेर्रक्षणं सभ्यता-रक्षणम् ॥

लोकतन्त्रे गुणाः, वर्जिता सा घृणा,
लोकतन्त्रे प्रियं, वर्जिता यातना ।
लोकतन्त्रे सुखं, वर्जितं शोषणं
लोकतन्त्रे हितं, वर्जित पीडनम् ॥

लोकतन्त्रे शिवं सुन्दरं राजते
सत्यभावाश्रयं सत्य-कर्माश्रयम् ।
विश्वबन्धुत्व-भावोदयं सन्ततं
विश्वशान्तिश्च क्रान्तिश्च मार्गो मतम् ॥

लोकतन्त्रे तु निर्वाचनं मन्यते
लोकतन्त्रे मतं सम्मतं गण्यते ।
लोकतन्त्राश्रया राजनीतिर्मता
लोकतन्त्राश्रयैव व्यवस्था मता ॥

लोकतन्त्रे तु राज्यं मतं साधनं
लोक-सौख्यं सदा साध्यमेवाश्रितम् ।
व्यक्ति-स्वातन्त्र्यमेवात्र मुख्यं मतं
निर्णयो निग्रहो वा मतेनाऽऽस्थितम् ॥

लोकतन्त्रे मतानां महत्त्वं मतं
राजनीतिश्च निर्वाचने संस्थिता ।
राजतन्त्रं तु निर्वाचितैश्चाल्यते
राष्ट्रसूत्रं च तैरेव सन्धार्यते ॥

लोकतन्त्रे विधानं सुधारो विधिः
निर्णयो निग्रहो लोक-संस्थापनम् ।
देशनीतिर्विदेशस्थ-नीति समा
लोक-निर्वाचितैरेव निर्णीयते ॥

लोकतन्त्रेऽधिकाराः समे मौलिकाः,
राजनीतिः समानाधिकाराश्रिया ।
बन्धुता मित्रता स्निग्धता संश्रिता,
भ्रातृभावोदयं सौख्य सञ्चारकम् ॥

ग्राम-पञ्चायतानां दृढा संस्थितिः
मण्डलानां विभिन्नाश्च संस्था स्थिता ।
स्थानमूलं स्वराज्यस्य संस्थापनं
लोकतन्मस्य मूलं मतं संवतम् ॥

लोकतन्त्रं तु वेदादिभिः स्वीकृतं
विश्ववन्द्यैः सुधीभिश्च सम्मानितम् ।
लिङ्कनेनादृतं गान्धिना पोषितं
विश्वशान्तेश्च सौख्यस्य मूल मतम् ॥

लोकतन्त्रे स्थिता देशभक्तिर्दृढा
देशरक्षा सुरक्षा स्वराज्यं शुभम् ।
देशभक्तिं विना देशरक्षां विना
जीवितं निष्फलं निष्फलं निष्फलम् ॥

लोकतन्त्रे विकासो विलासो ध्रुवः
आर्थिकी उन्नतिं मौलिकी उद्गतिः ।
उद्यमस्यापि पूर्णं महत्त्वं मतं
भाषणे लेखने चापि स्वातन्त्र्यकम् ॥

लोकतन्त्रे स्वदेशेऽस्ति शान्तिर्हढा
क्रान्तिरिष्टा मतानां प्रयोगाश्रया ।
क्रान्ति-शान्त्योश्च सम्मेलनं दृश्यते
दुःख-दावाग्नि-नाशोऽत्र संस्थीयते ॥

लोकतन्त्रं सुखस्यैक-मूलं मतं
लोकतन्त्रं मतं शान्ति-संस्थापकम् ।
लोकतन्त्रं भजेत्, लोकतन्त्रं श्रयेत,
लोकतन्त्रं जयेत्, लोकतन्त्रं चरेत् ॥

Proofread by Mandar Mali

*Lokatantram Jayet*

pdf was typeset on May 31, 2020

Please send corrections to *sanskrit@cheerful.com*